International Journal of Sanskrit Research 2016; 2(5): 77-79

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(5): 77-79
© 2016 IJSR
www.anantaajournal.com
Received: 18-07-2016
Accepted: 19-08-2016

**Dattatraya Hegde**
Sri Medha Dakshinamoorti Vedabhavana Sanskrit College, Gokarna, Kumta, Uttara Kannada, Karnataka, India

**Correspondence**
**Dattatraya Hegde**
Sri Medha Dakshinamoorti Vedabhavana Sanskrit College, Gokarna, Kumta, Uttara Kannada, Karnataka, India

# काव्यार्थानुसन्धानाद्यम-नियमसिद्धिः

## Dattatraya Hegde

### प्रस्तावना

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन।
योपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि॥

जगदीश्वरेण लोकहिताय वेदशास्त्राणि प्रादुर्भावितानि। तानि संसेवितानि यथोक्तं फलं जनयन्ति। अज्ञानेन विषयसुखरतानां जनानां समस्तदुःखसहनाय निरतिशयानन्दलाभाय वेदरक्षणाय च शिक्षाद्यङ्गानि न्यायवैशेषिकसाङ्ख्ययोगपूर्वोत्तरमीमांसारूपाणि दर्शनानि प्रवृत्तानि। मोक्षप्राप्तिर्हि विवेकवैराग्यादिना चित्तशुद्धौ सत्यां योगाभ्याससहकृतात्मज्ञानेनैव भवतीति योगदर्शनप्रेणेतारः प्रतिपादयन्ति। तस्मादेव तत्त्वज्ञाने योगशास्त्रं मुख्यसाधनं मत्त्वा महर्षिणा पतञ्जलिना सूत्ररूपेण योगदर्शनं प्रणीतम्। योगो नाम राजसतामसचित्तवृत्तीनाम् निराकरणम् इत्यर्थः। योगशास्त्रे पञ्च वृत्तयः उक्ताः। ताः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः। एतासां चित्तवृतीनां निरोधार्थं योगस्य अङ्गानाम् अभ्यासः अनुष्ठेयः इत्युक्तम्। तस्मात् योगः समाधिःए स च सार्वभौमश्चित्तस्य धर्मः। ष्यस्त्वेकाग्रे चेतसि सद्भूतम् अर्थं प्रयोजयति क्षिणोति च क्लेशान् कर्मबन्धनानि श्लथयति सः योगःष इति पातञ्जलयोगसूत्रभाष्ये। योगस्य अष्टावङ्गानि सन्ति। *यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावङ्गानि*
(पातञ्जलयोगसूत्रम्.साधनपादःएसू.२९)
यमनियमयोः अभ्यासेन राजस्तमोगुणाभ्यामनाकृष्टं मनःसत्वगुणायुक्तं भवति।
तत्र *यमो नाम-अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः॥*
(पा.यो.सू.पाद.२.सू.३०)
नियमो नाम *-शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥*
(पा.यो.सू.पाद.२.सू.३२)
समाधिस्थितिपर्यन्तं गन्तुकामस्य पुरुषस्य एते योगाङ्गाः सोपानरूपाः।
अष्टाङ्गेषु यमनियमयोः अनुष्ठानं आदौ भवेत्। एतयोः अनुष्ठाने अनेके उपायाः सन्ति। तेषु काव्यमार्गमन्यतमम्। काव्यं नाम चमत्कृतियुक्तः कवेः सन्दर्भः। लौकिकालौकिको वा विषयःयदा रमणीयरूपतया प्रतिपाद्यमानः सहृदयानाम् आनन्ददायको भवति तस्य काव्यमिति व्यपदेशःसाहित्यशास्त्रे। काव्ये वेदशास्त्रेषु विद्यमानाः विषयाः समाधुर्यं प्रदिपाद्यन्ते।
तदुक्तं साहित्यदर्पणे- श्चतुर्वर्गफलप्राप्तिः वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि काव्यादेव जायते।ष्इति। अयमेव विषयः श्लोकाभ्यां स्पष्टीक्रियते साहित्यदर्पणकारेण विश्वनाथेन-
*चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।*

*काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥*
*धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।*
*करोति प्रीतिं कीर्तिं च साधुकाव्यनिषेवणम्॥* इति।
एवं काव्यप्रकाशकारः मम्मटः काव्यप्रयोजनानि जगाद-
*श्काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कन्तासम्मिततया उपदेशयुजे। श्इति।*

चतुर्वर्गफलप्राप्तिर्हि काव्यतः रामादिवत् प्रवर्तितव्यं न रावणादिवत् इति कृत्याकृत्यप्रवृत्तिनिवृत्तिद्वारा भवतीति एषां श्लोकानां तात्पर्यम्। अनेन रामादिवदित्यत्र कृत्यं पित्राज्ञादि विहितं कर्मए अकृत्यं निन्दितं परदारापहरणादिकं कर्म तयोः क्रमेण प्रवृत्तिनिवृत्तिरूपोपदेशः काव्यात् सिद्ध्यतीति फलितम्।

एवं काव्यार्थस्य अनुसन्धानेन योगस्य यानि यमनियमादीनि अष्टौ अङ्गानि सन्ति तेषु यमनियमयोः सिद्धिः सुकरतया सम्भवति। अन्ये उपायाः यमनियमसिद्धौ हेतुभूताः क्लिष्टतया यमनियमौ बोधयन्ति। किन्तु कान्तासम्मिततया काव्यानि समाधुर्यं यमनियमादीनाम् उपदेशं कुर्वन्ति। तदा इतरोपायापेक्षया कव्यादेव यमनियमसिद्धिः सुकरा इति साधकाः काव्यार्थानुसन्धाने निमग्नाः भवन्ति। तेन तेषां योगभ्यासः सुकरः इति निश्चितम्। तदुक्तं साहित्यदर्पणे.

"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्त्वे कस्य वा रोगिणः सितशर्करावृत्तिः साधीयसी न स्यात्।" इति।

इदानीं यमनियमयोः प्रत्येकस्य अंशस्य लक्षणं उक्त्वा तेषां सिद्धिः काव्यात् कथं सम्भवतीति निरूपयामः। योगसूत्रानुसारं अहिंसा.सत्य.अस्तेय.ब्रह्मचर्य. अपरिग्रहाः यमाः इत्युच्यन्तो। तत्र यमे आद्यः अहिंसा इति। अस्याः लक्षणं तु योगसूत्रस्य भाष्यानुसारं दृ श्सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः।" इयमेव काव्ये निबद्धा अहिंसारूपम् अर्थं काव्यर्थानुसन्धातॄणां बोधयति। तस्याः अनुष्ठानार्थं प्रेरयति च।

एवं यमनियमयोः प्रत्येकस्यापि अंशस्य विषये अवगन्तव्यम्।

उदाहरणरूपेण पञ्चमहाकाव्येषु अन्यतमस्य कालिदासविरचितस्य रघुवंशमहाकाव्यस्य कांश्चन श्लोकान् अवलोकयामः। वक्ष्यमाणयोः श्लोकयोःसन्दर्भः एवम् अस्ति.

रघुवंशीयः राजा दिलीपः शापापनोदनार्थं वने धेनोः सवां कुर्वन् आस्ते। तत्र धेनोः भक्षणार्थं सिंहः प्रकमते। तदा अयं दिलीपः धेनुभक्षणरूपां हिंसां मा कुरुद्ध्वमिति वदति। उदाहरणम्.

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।

राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा॥ (रघुवंशः, सर्गः२एश्लोकः५३द्ध

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः।

न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः॥ (रघुवंशः, सण्२एश्लोण्५५द्ध

श्लोकयोः भावः एवमस्ति. यः क्षत्रियः राजा भवति सः जीविविषयकहिंसां निवारयति। अतः धेनुरक्षकोहं स्वदेहार्पणक्रियया धेनुभक्षणरुपां हिंसां निवारयामि इति सिंहमुद्दिश्य वदति।

अनेन राज्ञः दिलीपस्य स्वदेहत्यागपूर्वकः अहिंसारुपः अर्थः सूचितः। काव्यमिदं दिलीपस्य वृत्तान्तवर्णनेन काव्याध्ययनरतान् दिलीप इव प्रवर्तितव्यमिति अहिंसाकृत्ये प्रवर्तयति। अस्यार्थस्य पुनः पुनरनुसन्धानेन योगाभ्यासरताः अहिंसामार्गमनुसरन्ति।

**सत्यम्**- सत्यं यथार्थे वाङ्मनसी। यथा दृष्टं यथानुमितं यथा श्रुतं तथा वाङ्मनश्चेति।

रामायण.महाभारतयोः अध्ययनेन अस्माभिः ज्ञायते यत् सत्यप्रतिज्ञः रामः पितृवाक्यपालनार्थं अयोध्यां त्यक्त्वा सीतालक्ष्मणाभ्यां सह वनं जगाम। एवं युधिष्ठिरः आजीवनं सत्यनिष्ठः अभूदिति।

**अस्तेयम्.** अशास्त्रपूर्वकंद्रव्याणां परतः स्वीकरणम् स्तेयम्। तत्प्रतिषेधः अस्पृहारूपम् अस्तेयमिति। उदाहरणम्.

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥; रघुवंशःएसण्१एश्लोण्१८द्ध

अयं श्लोकः रघुवंशमहाकाव्ये राज्ञः दिलीपस्य आधिपत्यवर्णनसन्दर्भे उक्तः। अयं राजा प्रजानाम् अभ्युदयार्थमेव तेभ्यः करग्रहणम् अकरोत्। अनेन ज्ञायते यत् शास्त्रपूर्वकमेव दिलीपः प्ररतः द्रव्यस्वीकरणम् चकार। अस्मिन् विषये अस्य लोभराहित्यं द्योत्यते।

**ब्रह्मचर्यम्.** ब्रह्मचर्यं नाम इन्द्रियस्य संयमः।

उदाहरणम्.

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥; रघुवंशः एस. १एश्लोण्७द्ध

रघुवंशीयानां राज्ञां जीवनशैलीं निरूपयन् कालिदासः श्लोकमिदम् रचयामास। अत्र प्रजायै गृहमेधिनाम् इत्यस्ति।एते राजानः धर्मप्रजासम्पत्त्यर्थमेव विवावविधिना दारपरिग्रहणम् अकुर्वन् न तु विषयसुखाय। अनेन रघुवंशोद्भावाः राजानः आजीवनं ब्रह्मचर्यवृतपालनम् अकुर्वन्निति।

**अपरिग्रहः**.विषयाणाम् अर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः। उदाहरणम्.

तेनार्थवांल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान्।

तनास लोकः पितृमान् विनेत्रा तेनैव शोकापनुदेन पुत्री॥; रघुवंशःएसण्१४ण्श्लोण्२३द्ध

प्रजाः रामे राज्यं शासति सति सुखेन आसते इत्ययमर्थः श्लोकादवगम्यते। अत्र रामस्य लोभराहित्येन जनाः अर्थवन्तः अभूवन्निति प्रदिपादितम्। लोभेन यदि प्रजानाम् धनं स्वीक्रियते तदा दोषायैव भवेदिति मत्त्वा रामः विषयाणां त्यागमेव वरमिति अमंस्त।अत्र अपरिग्रहणेन रामसदृशः भवति । तस्मात् अस्माभिरपि तथा भवितव्यमितिकव्याभ्यासिनां प्रज्ञा उदेति।

नियमे शौच. सन्तोष. तपः. स्वाध्याय. ईश्वरप्रणिधानानि अन्तर्भवन्ति।

**शौचम्.** मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्। आभ्यन्तरं चित्तमलानामाक्षालनम्। उदाहरणम्.

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः।

त्यक्षामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव॥; रघुवंशः एस.१४एश्लोण्३९द्ध

अनेन श्लोकेन रक्षोभवनोषितायाः सीतयाः पुनः परिग्रहणेन रामस्यविषयकः यःअपवादः सम्प्रवृत्तः तादृशम् चित्तमलम् सीतायाः परित्यागेन परिमार्ष्टुं रामः ऐच्छदिति ज्ञायते।

**सन्तोषः**.संनिहितसाधनादधिकस्यानुपादित्सा। उदाहरणम्.

न मोक्षस्याकांक्षा भवविभववाञ्छापि च न मे

न विज्ञानापेक्षा शशिमुखिसुखेच्छापि न पुनः।

अतस्त्वां संयाचे जननि जननं यातु मम वै

मृडानी रुद्राणी शिव शिव भवानीति जपतः॥८॥; देव्यपराधक्षमापनस्तोत्रम्एशङ्कराचार्यरचितम्द्ध

शङ्कराचार्यः देव्याः स्तवनसन्दर्भे मम अस्मिन् संसारे किमपि अधिकापेक्षा नास्ति। यदि मया भक्त्या देयाः नामसङ्कीर्तनं क्रियते चेत् तस्मादेव मम निश्रेयससिद्धिः भवति। अतः भक्तिरेव महत्साधनम्। तस्मात् अत्रैव मम रुचिरिति जगाद। अनेन भक्तिसाधनेन विनाए अन्योपायस्य इच्छा नास्तीति सूचितम्।

**तपः.** द्वन्द्वसहनम्।द्वन्द्वं च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च। काष्ठमौनं हि इङ्गितेनापि स्वाभिप्रायाप्रकाशनम्। उदाहरणम्.

गुणदोषौ बुधो गृह्णन् इन्दु क्ष्वेडाविवेश्वरः।

शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥ (कुवलयानन्दः)

विद्वान् परेषां गुणं स्वीकृत्य श्लाघते। दोषं विज्ञायापि मौनं स्वीकरोति नतु बहिःप्रकाशयति इति श्लोकस्यास्य भावः।अत्र परेषां दोषज्ञानेपि दोषोद्घाटनं न करणीयमिति काव्यमिदं उपदिशति।

**स्वाध्यायः.** मोक्षशास्त्राणाम् अध्ययनं प्रणवजपो वा।

श्लोकः. शैशवे अभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

अनेन श्लोकेन रघुवंशीयाः राजानः वृद्धे वयसि मुनिवृत्तिं स्वीकृत्य मोक्षविषयकशास्त्राणाम् अध्ययनं तथा तपश्चरणं कुर्वन्ति स्म। तस्मादेव

योगाङ्गानाम् अभ्यासेन समाधिस्थितिपर्यन्तं गत्त्वा भौतिकं शरीरम् अत्यजन्निति ज्ञायते।

**ईश्वरप्रणिधानम्**. तस्मिन् परमगुरौ सर्वकर्मार्पणम्।

श्लोकः. सर्वालङ्कारयुक्तांसरलपदयुतां साधुवृत्तां सुवर्णाम्
सद्भिः संस्तूयमानां सरसगुणयुतां लक्षितां लक्षणढ्याम्॥
उद्यद्भूषाविशेषामुपगतविनयां द्योतमानार्थरेखाम्
कल्याणीं देव गौरीप्रिय मम कविताकन्यकां त्वं गृहाण॥ (शङ्कराचार्यरचितम् शिवानन्दलहरीएश्लो९८द्ध

परमेश्वरं कविताभिः सन्तोष्य अन्ते परमेश्वराय स्वकृतस्तुतिकर्मणः अर्पणं दृश्यते। अतः अस्मिन् श्लोके शङ्कराचार्येण परमेश्वरमेव परमगुरुं मत्त्वा सर्वकर्मार्पणं तस्मिन् कृतमिति अवगन्तुं शक्यते।

एवं योगाङ्गेषु यमनियमयोः प्रतिपादनं मधुरया शैल्या क्रियते। ये योगसाधने निरताः ते अवश्यं काव्यानां अध्ययनं पुनः पुनरनुसन्धानं च यदि कुर्वन्ति तदा निश्चयेन तेषां यमनियमसिद्धिः भवेदिति मे मतिः।

**आकरग्रन्थानां सूची**

**कुवलयानन्दः** अप्पय्यदीक्षितविरचितः, भोलाशङ्करव्यासकृतया अलङ्कारसुरभिव्याख्यया सहितः, चौखम्भा विद्याभवनम्, वाराणसी, 2005.

1- **पातञ्जलयोगसूत्रवृत्तिः** श्री रामानन्दयतिविरचितया मणिप्रभाटीकया सहितम्, कृष्णदास अकाडेमि, वाराणसी, 1996.

2- **रघुवंशम्-** कालिदासविरचितम्, मल्लीनाथकृतसञ्जीवनीव्याख्यासहितम्, कृष्णदास अकाडेमि, वाराणसी, 1984.

3- **शिवानन्दलहरी-** श्री शङ्कराचार्यरचितम्, श्री रामकृष्णाश्रमः, मैसूरु, 1968.

4- **श्रीशाङ्करस्तोत्राणि-** (कन्नडभाषा)मूलमात्रम्, श्री भगवत्पादप्रकाशनम्, स्वर्णवल्लीमहासंस्थानम्, सोन्दा, शिरसि, उ.क., 2012.

5- **साहित्यदर्पणः** विश्वनाथकविरचितः, कृष्ण मोहनशास्त्रिकृतलक्ष्मीव्याख्यासहितः, चौखम्भा- संस्कृसंस्थानम्, वाराणसी, 2011.